## पदास्वैरिबाह्यापक्ष्येषु च । (११९/२८७०)

पदे अस्वैरिणि बाह्यायां पक्ष्ये चार्थे ग्रहेर्धातोः क्यप् प्रत्ययो भवति । पदे तावत् — प्रगृह्यं पदम्, यस्य प्रगृह्यसञ्ज्ञा विहिता । अवगृह्यं पदम्, यस्यावग्रहः क्रियते । अस्वैरी परतन्त्रः । गृह्यका इमे । गृहीतका इत्यर्थः । बाह्यायाम् — ग्रामगृह्या सेना । नगरगृह्या सेना । ग्रामनगराभ्यां बहिर्भूता इत्यर्थः । स्त्रीलिङ्ग- निर्देशादन्यत्र न भवति । पक्षे भवः पक्ष्यः । [1]वासुदेवगृह्याः । [2]अर्जुनगृह्याः । [3]तत्पक्षाश्रिताः इत्यर्थः ॥

## विभाषा कृवृषोः । (१२०/२८७१)

[4]कृञो वृषश्च विभाषा क्यप् प्रत्ययो भवति । करोतेर्ण्यति प्राप्ते (३. १. १२४/२८७२) वर्षतेः ऋदुपध- त्वात् नित्ये क्यपि प्राप्ते (३.१.११०/२८५९) [5]विभाषारभ्यते । कृत्यम्, [6]कार्यम् । वृष्यम्, वर्ष्यम् ॥

## युग्यं च पत्रे । (१२१/२८७३)

युग्यम् इति निपात्यते [7]पत्रं चेत् तद् भवति । पतत्यनेन इति पत्रं वाहन[8]मुच्यते । युग्यो गौः । युग्योऽश्वः । युग्यो हस्ती । युजेः क्यप् कुत्वं च निपात्यते । पत्रे इति किम् ? योग्यम् अन्यत् ॥

## अमावस्यदन्यतरस्याम् । (१२२/२८७४)

अमाशब्दः सहार्थे वर्तते । तस्मिन्नुपपदे [9]वसेर्धातोः कालेऽधिकरणे ण्यत् प्रत्ययो भवति, [10]तत्रान्यतरस्यां [11]वृद्ध्यभावो निपात्यते । सह वसतोऽस्मिन् काले सूर्याचन्द्रमसौ इति अमावास्या, अमावस्या । एकदेशविकृतस्यानन्य- त्वाद् 'अमावास्याया वा' (४.३. ३०/१४०३) इत्यत्र अमावस्याशब्दस्यापि ग्रहणं भवति ।

अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् ।
तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति ॥ (म.भा.२.८७)

## छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्म- वाद्यभाव्यस्ताव्योपचाय्यपृडानि । (१२३/३४०७)

निष्टर्क्यादयः शब्दाश्छन्दसि विषये निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । निष्टर्क्यः इति 'कृती छेदने' (धा.पा.१४३६) इत्यस्मान् निस्पूर्वात् क्यपि प्राप्ते [12]ण्यत्, आद्यन्तविपर्ययश्च, निसश्च षत्वं निपात्यते । 'निष्टर्क्यं चिन्वीत पशुकामः' ( ऐ. आ. ५. १.३ ) । देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप्, दीर्घस्तुगभावश्च । देवहूयः ( श. ब्रा. २. १. ३. २ ) ।

---

1. नास्ति अ. 2. नास्ति फ. 3. तत्पक्षमाश्रिताः फ. ह. 4. करोतेः वर्षतेश्च अ. इ. ह. 5. क्यप् विकल्प्यते फ. 6. नास्ति ब. 7. पत्रेऽभिधेये अ. ग. 8. उच्यते नास्ति अ. क. ड. ह. 9. वसतेः अ. 10. तत्र नास्ति फ. 11. वृद्ध्यभावश्च निपातनात् फ. 12. ण्यत् नास्ति फ.